National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(23): 44-46
© 2019 NJHSR
www.sanskritarticle.com

**आनन्दमोहनजोशी**
शोधच्छात्र:(सांख्ययोगविभाग:),
श्रीलालबहादुरशास्त्री राष्ट्रिय संस्कृत-
विद्यापीठम्,नवदेहली-110016

**Correspondence:**
**आनन्दमोहनजोशी**
शोधच्छात्र:(सांख्ययोगविभाग:),
श्रीलालबहादुरशास्त्री राष्ट्रिय संस्कृत-
विद्यापीठम्,नवदेहली-110016

# कापिलसाङ्ख्ये पुरुषस्वरूपम्

**आनन्दमोहनजोशी**

महर्षिकापिलप्रणीते सांख्यशास्त्रे द्वादशतमसूत्रतः समारभ्य विंशतितमसूत्रं यावत् पुरुषस्वरूपं प्रतिपादितमस्ति। तद्यथा -

कालयोगेन पुरुषः बद्धो नैव भवति। यतः नित्यत्वात् सर्वोपरि पूर्णत्वात् तस्य कालस्य मुक्तबद्धपुरुषैः सह समभावेन सम्बन्धोऽस्ति। अत्र कालवादिनो मतमिदं वर्तते, यत् कालो चिन्त्यशक्तिपदार्थोऽस्ति तत् सम्बन्धेन बद्धस्तादीनां षड्ऋतुनामिव पुरुषस्यापि बन्धो भवति। परन्तु अयं सिद्धान्तः सम्यग्नैव वर्तते। यतः कालवादी कालं नित्यं सर्वव्यापकञ्च स्वीकरोति। यदीह तेन सम्बन्धेन बन्धः स्वीक्रियते तर्हि कोऽप्यस्मिन् जगति मुक्तिं नैव प्राप्तुं शक्नोति, यतः व्यापकत्वात् सर्वैः पुरुषैः सह तस्य कालस्य समभावेन सम्बन्धोऽस्ति। अतः स सम्बन्धो कालस्य नित्यत्वात् नित्योऽस्ति। अत एव कालसम्बन्धेन पुरुषै बन्धस्य स्वीकरणन्नैव शोभते।[1] दिक् सम्बन्धेनापि पुरुषे बन्धो नैव भवति। यतः व्यापकत्वात् नित्यत्वाच्च तस्यापि सर्वैः पुरुषैः सह समभावेन सम्बन्धोऽस्ति कथनस्यास्य तात्पर्यमिदमस्ति यदिह दिशः सर्वव्यापकाः नित्याश्च स्वीक्रियन्ते। तर्हि पुरुषेण मुक्तिं नैव प्राप्तुं शक्यते। अत एव दिग्भ्यः सह सम्बन्धेन पुरुषः नैव बध्यते।[2] शरीरस्य बालकौमारयौवनाद्यवस्थाभिश्चापि पुरुषो नैव भवति। यतः इमा अवस्थाश्चापि देहधर्मस्वरूपाः सन्ति। अयं पुरुषो कूटस्थो नित्याश्चास्ति -

अतोऽत्र अवस्था पुरुषस्य धर्मं भवितुर्न्नैवार्हन्ति यतः यस्य पदार्थस्य स्वरूपं तथा च धर्मस्वरूपं नैव परिवर्तते। किन्तु नित्यमेवैकरसं भवति। तत् कूटस्थनित्यमुच्यते यदि अवस्था पुरुष धर्मत्वेन स्वीक्रियेत्। तर्हि सः पुरुषः कुटस्थनित्यो भवितुर्न्नैवार्हति। यतोऽवस्थायाः परिवर्तनं भवत्येवेति तामवस्थां पुरुषधर्मत्वेन नैव स्वीक्रियते। शुभाशुभकर्मभिश्चापि पुरुषस्य बन्धो नैव स्वीक्रियते। यतः शुभाशुकर्माणि पुरुषस्य धर्मभूतानि नैव वर्तते। अस्य धर्मप्रभावतोऽप्यस्य बन्धः स्वीक्रियते, तर्हि मुक्तस्यापि बन्ध स्वीकर्तुं शक्यते। अत्र तात्पर्यमिदमस्ति शुभाशुभकर्माणि बुद्धिसंघातस्य धर्माः सन्ति। पुरुषस्य धर्माः नैव। यतः सः पुरुषः चेतनत्वात् निष्क्रियोऽस्ति।[3] अनेन पुरुषःशुभाशुभकर्माणि नैव बध्यते। यदि अस्य धर्मत्वात् अयं बद्धं स्वीकुर्वन्ति। तर्हि जगति कोऽपि मुक्तिं नैव लप्स्यते। यतः बद्धजीवानां कर्मणि मुक्तपुरुषोऽपि पुनः बद्धो भवितुमर्हति अनेन शुभाशुभकर्मभिज्ञः पुरुषः बद्धो नैव भवति।[4]

एकस्य कर्मणा अपरं फलप्राप्तिर्भवति। तर्हि जीवनां सुखदुःखानां वैलक्षण्यं नैव भवितुमर्हति। अस्मिन् लोके च कोऽपि सुखपूर्वकं कश्चित् दुःखश्चापि जीवनं यापयति,[5] यदिह प्रकृत्याः सम्बन्धेनापि पुरुषे बुद्धो स्वीक्रियते। तर्हि इदमपि कथनं नैव शोभनं यतः सः प्रकृतिः पुरुषस्य बन्धभावे अविवकहीना वर्तते। पुरुषस्य व्यापकत्वात् बुद्धैः मुक्तेः जीवैः सहापि च समभावेन तस्याः सम्बन्धो वर्तते। एवञ्च समसम्बन्धत्वात् बन्धमोक्षयोः कोऽपि व्यवस्था नैव भवति। अत एव मुक्तोऽपि बद्धो भवितुमर्हति। सांख्यशास्त्रे यः प्रकृतिसम्बन्धः बन्धहेतुः स्वीक्रियते। स अविवेकेनैव स्वतः अत एव केवलं प्रकृतिसम्बन्धे नापि पुरुषः बद्धो नैव भवति।[6] नित्यशुद्धबुद्धमुक्तस्वभावात्मकं जीवात्मानं बद्धोऽविवेकेनैव भवति। जीवात्मानं यः बन्धो भवति, सः प्रकृतिपुरुषयोः संयोगाभ्यां भवति। यतः दुःखसम्बन्धरूपं प्रकृतिपुरुषयोः संयोगाभ्यां भवति। यतः दुःखसम्बन्धरूपं प्रकृतेः धर्मोऽस्ति। प्रकृत्या पुरुषेण सह अविवेककृतः तादात्म्यसम्बन्धोऽस्ति। तस्मादेव पुरुषे बन्धः समारोप्यते। यथा लोहे अग्निधर्माणां आरोपो भवति।[7] अविद्यातोऽपि पुरुषे बन्धो नैव भवति। यतः साविद्यया अवस्तुभूता वर्तते। एवं अवस्तुभूतयः च बन्धभावं यतः स्वीकरणं नैव सम्यक्।

यतोऽत्रनुभव सिद्धमस्ति। वस्तुभूतेन रज्जवैव पुरुषादयो बध्यन्ते। अवस्तुभूतायाः स्वप्नरागवानैव। अत एव अविद्यायाः पुरुषः बद्धो नैव भवति। अतोऽत्र पुरुषः केनाप्युपायेन नैव बद्धो भवतीति स्वीक्रियन्ते। यतः पुरुषः नित्यशुद्धबुद्धमुक्तस्वभावात्मकोऽस्ति। अत एव पुरुषः स्वतन्त्ररूपेण स्वयमेव सर्वदैव मुक्तो स्वीक्रियतेतरामिति।[8]

गतिविशेषेणापि पुरुषो बाह्यो नैव भवति। यतः क्रियापरिणामशून्यत्वात् तस्मिन् गतिः नैव सम्भवति।[9] इहलोकात् परलोके, परलोकात् इहलोके पुरुषस्य गमनागमनयोरेव नाम गतिविशेषोऽस्ति। परन्तु पुरुषे गतिविशेषेण बन्धस्य स्वीकरणं समीचीनन्नैव। यतः उत्पन्नत्वात् विनाशित्वाच्च गतिः विकारमयी वर्तते। सागतिः परिणामिना पदार्थे नैव भवितुमर्हति। अपरिणामिनिन पुरुषे, कूटस्थ नित्ये सा गतिः भवितुन्नार्हति। अत एव पुरुषे गतिः विशेषतोऽपि बन्धस्वीकरणन्नयुक्तियुक्तम्। यथा घटादीनि वस्तुनि मध्यमपरिमाणत्वात् सवयवानि विनाशिनी च वर्तन्ते। इत्थमेव पुरुषोऽपि मूर्तत्वात् अर्थात् मध्यमपरिमाणत्वात् सावयवो विनाशी च सम्पत्स्यते। परन्तु इत्थमिह सिद्धान्त।[10] तर्हि सः पुरुषः सावयवतत्वादनित्यो भविष्यति यतः पदार्थः मध्यमपरिमाणवान् सावयवो भवति। यः सावयवो भवति, सो नित्योऽपि इत्थं जीवात्मानां मध्यमपरिमाणत्वेन ज्ञात्वा गतिविशेषेण तस्या बन्धभावस्वीकरणं सम्यङ्नैव।

यथा[11] घटादिरूपोपाधेः सम्बन्धेन ह्याकाशे गतिश्चागतिः भवति, तथैव पुरुषोऽपि उपाधियोगात् बुद्धिरूपाः उपाधिसम्बन्धात् या गतिः अगतिश्च भवति। तस्याः गतिप्रतिपादका श्रुतिः प्रतिपादिनघङ्करोति। वैदिकसिद्धान्ते जीवात्मा पुरुषः सत्वित्स्वरूपात्मकोऽपि परिमाणवत् स्वीक्रियते। सः पुरुषो नित्यकूटस्थत्वादृतोः क्रियारूपिणो विकाराणां श्रूयते भवितुन्नार्हति।[12]

अग्रेऽपि सूत्रितमस्ति - तस्येहलोकात् परलोकं परलोकादिहलोके च या गतिश्चागतिः भवति। सा बुद्धिरूपोपाधिना भवति। इत्थं बुद्धिरूपेणापाधिना पुरुषस्य लोके लोकान्तरे वा या गमनागमनक्रिया भवति। तस्यैव गतिप्रतिपादिकश्रुतिः प्रतिपादनङ्करोति। नैवास्या ‘शुभाशुभैः कर्मभिः पुरुषः बद्धो नैव भवति। यतः कर्माणि पुरुषस्य धर्मं स्वरूपाणि नैव भवन्ति। कर्मणामात्रस्तु बुद्धिः वर्तते। नैव पुरुषः अनेन कर्मणापि बन्धभावः स्वीकरणं नैव समीचीनम्।[13] अन्यधर्मत्वेनान्यस्य बन्धस्वीकरणादेव मुक्तोऽपि बन्धात्मको भविष्यति। यथा बुद्धयाः परतरो बुद्धपुरुषोऽस्ति तथैव मुक्तोऽपि। यद्यन्यधर्मत्वेनान्यं स्वीकुर्यात् तर्हि बद्ध पुरुष इव मुक्तपुरुषोऽपि बद्धो भवेत। अनेनेदं सिध्यति यदिह अदृष्टैः बन्धस्वीकरण नैव सम्यक्। यदिह अदृष्टः पुरुषधर्मत्वेन स्वीक्रियते।[14] तर्हि पुरुषस्य निर्गुणादि वैशिष्टङ्ग्प्रतिपादकायाः श्रुतेः विरोधो भविष्यति। अनेन अदृष्टाः पुरुषधर्माः नैव स्वीक्रियन्ते यतः पुरुषो विकाराणां गुणानां य सम्बन्धेन रहितोऽस्ति।

प्रकृत्या येन सम्बन्धेन पुरुषस्य बन्ध स्वीक्रियते। सोऽविवेकादेव भवति। अनेन तस्याः प्रकृत्याः बद्धपुरुषेण मुक्तपुरुषेण वा नैव समानताः।[15] यतः मुक्तपुरुषेषु विवेकात् ह्याविवेको विनष्टोऽभूत। एवञ्च अविवेकनष्टत्वात् केवलं प्रकृतेः संयोगे विद्यमाने सति सा प्रकृतिः बन्धकारणन्नैव भवति। प्रकृतिपुरुषयोः ह्याविवेकादन्याविवेकानामुत्पत्तिर्भवति, एवञ्च तत् निवृत्तेः अन्येषामविवेकानां निवृत्तिर्भवति। प्रकृति पुरुष विवेकत्वादेव पुरुषः बुद्धेरिव देहेन्द्रियपुत्रकालत्रदीनिव स्वात्मत्वेन ज्ञात्वा तेषां नष्टत्वात् आत्मनाशं स्वीकरोति।[16]

अनेन विवेकज्ञानेन ह्याविवेकाः नष्टाः भवन्ति। तेभ्यो ह्यविवेकेभ्यः अन्येऽप्यविवेकाः स्वयमेव नष्टाः जायनते। बन्धो विवेको प्रयत्नः प्रभृतिश्चेति सर्वे धर्माः पुरुषे औपाधिकाः सन्ति।[17] नैव स्वाभाविकाः यतः स्वभावात् तेषां स्थितिः बुद्धिरेव। यथा शक्तितमाजपापुष्पस्य स्वाभाविको धर्मोऽस्ति। पुष्पसिन्नधानात् स्फटिके प्रतीतिमात्रम्भवति। वस्तुतः पुष्पं स्फटिके नैव। अनेन बन्धो विवेको विवेकः प्रयत्नादयश्च धर्माः सन्ति। ते सर्वे बुद्धो स्थिता। पुरुषो नैव केवलं बुद्धिरूपाः उपाधे सिन्नधानात् पुरुषे तेषां प्रतीतिर्भवति। इयं प्रतीति वाङ्मात्रेण स्वीक्रियन्ते।

यतोऽत्र केनापि कारणेन पुरुषस्य बन्धो नैव भवति। यतः सः पुरुषः कूटस्थनित्योऽस्ति। इत्थमिह पुरुषः स्वयं बद्धो नैव स्वीक्रियते।[18]

ईश्वरे ह्येतादृशङ्किमपि ज्ञानं नैव वर्तते। यदसन्नपि भवेत्। यतस्तस्येश्वरस्य ज्ञानं नित्यमेवास्ति। अत एव प्रत्यक्षस्य ईश्वरे सिद्धि नैव ईश्वरः सर्वशक्तिमान सर्वथा स्वतन्त्रश्चास्ति, तर्हि तस्य ज्ञानं पुरुषमिवेन्द्रियाधीनं नैव भवितुमर्हति। इत्थं विवेचनेनेश्वरे प्रोक्तदोषस्य सर्वथा सिद्धिर्भवति।[19] मुक्तबद्धयोरन्यतरस्याभावात् तस्येश्वरस्य सिद्धिनैव भवति। यदिहेश्वरो मुक्तस्वभावात्मकः स्वीक्रियते, तर्हि तस्मात् सृष्टिः नैव भविष्यति। यदि बद्धो मन्यते, तर्हि तस्मिन् ईश्वरस्वरूपो नैव भविष्यति। अत एवैताभ्यां मताभ्यां ईश्वरसिद्धः नैव भवति। यतः मुक्तस्वभावात्मकस्य परमात्मनः प्रशंसा प्राप्यते।[20]

**एवञ्च सृष्टिकर्तुः परमात्मनश्चोपासना प्राप्यते।**

(सपर्य्यगाच्दुक्रमकायमक्रणमस्नाविरशुद्धमपापविद्धम्,कविर्म-नीषीपरिभूः स्वभ्भूर्या- - यजु- 4/8)

तात्पर्यमिदमस्ति यत् सर्वेभ्यो दुःखेभ्यो शून्यत्वात् परमात्मा मुक्तः कथ्यते। अत एव मुक्तपक्षे कोऽपि दोषो भवति। एवञ्च कर्तृत्वपक्षेऽपि दोषो नैव यतः सृष्टिकारणादपि स बन्ध नैव प्राप्नोति।[21] प्रकृतेः सामीप्यात् मणिमीश्वरे जगत् कर्तृत्वभावोऽस्ति। यथा अयस्कान्तमणेः सामीप्यात् लोहे चेष्टा भवति।

**सन्दर्भग्रन्थ :-**


1. न कालयोगतो व्यापिनो नित्यस्य सर्वसम्बन्धात्।
2. न देशयोगतोऽप्यस्मात्। सां- सू- प्र- अ- सू- 12-13
3. नावस्थातो देहधर्मत्वात् तस्याः।
4. असङ्गोऽयं पुरुष इति। सां- सू- प्र- अ- सू- 14-15
5. न कर्मणान्यधर्मत्वादतिप्रसक्तेश्च।।
6. प्रकृतिनिबन्धनाच्चेत्, न तस्या अपि पारतन्त्रयम्।सां.सू.प्र.अ.सू. 16-18
7. न नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगस्तद्योगादृते।
8. नाविद्यातोऽप्यवस्तुना बन्धायोगात्। सां- सू- प्र- अ- सू- 19-20
9. न गतिविशेषात्।

10.निष्क्रियस्य तदसम्भवात्।
11.मूर्तत्वाद् घटादिवत् समानधर्मापत्तावप सिद्धान्तः। सां- सू- प्र- अ- सू- 48-50
12.गतिश्रुतिरप्युपाधियोगादाकाशवत्। सां- सू- प्र- अ- सू- 51
13.कर्मणाप्यतद्धर्मत्वात्।
14.अतिप्रसक्तिरन्यधर्मत्वे।
15.निर्गुणादिश्रुतिविरोधश्चेति।
16.तद्योगोऽप्यविवेकान्न समानत्वम्। सां- सू- प्र- अ- सू- 52-55
17.प्रधानाविवेकादन्याविवेकस्य तद्धाने हानम्।
18.वाङ्गमात्रं न तु तत्त्वं चित्तस्थितेः। सां- सू- प्र- अ- सू- 57-58
19.ईश्वरसिद्धेः।
20.मुक्तबद्धयोरन्यतराभावान्न तत्सिद्धिः। सां- सू- प्र- अ- सू- 92-93
21.मुक्तात्मनः प्रशंसा, उपासा सिद्धस्य वा। सां- सू- प्र- अ- सू- 95